National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 133-135
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Radhakanta Panda**
Asst. Professor in Advaita Vedanta,
Shri Jagannath Sanskrit University,
Shri Vihar, Puri

**Correspondence:**
**Dr. Radhakanta Panda**
Asst. Professor in Advaita Vedanta,
Shri Jagannath Sanskrit University,
Shri Vihar, Puri

# ज्ञाननिवर्त्यत्वविचारः

**Dr. Radhakanta Panda**

**उपोद्घातः -**

मिथ्याशब्दोऽनिर्वचनीयतावचनः इति पञ्चपादिकाकारवचनमनुसृत्य सदसत्वानधिकरणत्वरूपं मिथ्यात्वं प्रतिपाद्य विवरणकारीयं मिथ्यात्वलक्षणं **बाध्यत्वमेव मिथ्यात्वम्** प्रतिपादितमद्वैतसिद्धिकारैः श्रीमधुसूदनसरस्वतिपादैः। तच्च बाध्यत्वं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं ज्ञाननिवर्त्यरूपं वा। तत्र सिद्धौ द्वितीयमिथ्यात्वलक्षणत्वेन प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं प्रतिपाद्य विवरणकारीयं मिथ्यात्वलक्षणमपरं यदद्वैतसिद्धौ क्रमात्तृतीयं भवति तदिदं सङ्गृहीतम्- 'ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम्' इति। इदं लक्षणं- 'विद्वान् नामरूपाद्विमुक्तः' 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इत्यादिश्रुतिमूलकम्।

यथा लोके 'धान्येन धनवान्' इत्युक्ते सति धान्यप्रयोज्यत्वं धने प्रतीयते, तथैव यतो विद्वान् अतो नामरूपोपलक्षितसमस्तशोकमोहरूपसंसाराब्धिपारंगत इति 'विद्वान् नामरूपाद्विमुक्तः' इति श्रुत्यर्थः। एवमेव 'ज्ञात्वा देवम्' इत्यत्र क्त्वाप्रत्ययेन सर्वपाशविमोकात् प्राग्भावित्वं ज्ञानस्य प्रतीयते। कारणत्वञ्च प्राक्कालघटितमेव। तथा च सर्वपाशविनाशकारणत्वं ज्ञाने लब्धम्।तथा च ज्ञाननाश्यत्वं ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम। तच्च ज्ञाननिष्ठकारणतानिरूपितकार्यतावन्नाशप्रतियोगित्वम् । नाशकं ज्ञानम्, नाश्यं मिथ्यावस्तुमात्रम् ।यथा सकलशास्त्रसारभूता अद्वैतामृतबर्षिणी श्रीमद्भगवद्गीता मुक्तकण्ठेनोद्घोषयति -

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।**
**तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।।** (गीता.५।१६)

एषां श्रुतिस्मृत्युक्तसिद्धान्तानां शङ्काजननतन्निवारणमुखेन दाढ्र्याय तृतीयं लक्षणं लक्षितमाचार्यैः- 'ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम्' - इति। तत्र विप्रतिपन्नानां तदर्थव्यवस्थापनार्थं अद्वैतसिद्धौ द्वैतिनाम् आक्षेपानुद्भाव्य तत्परिहारं विधाय इदमत्र लक्षणमुपपाद्यते ।

**अत्रायं पूर्वपक्षः -**

ज्ञाननिवर्त्यत्वं न मिथ्यात्वलक्षणं भवितुमर्हति।उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने सत्यभूतेऽपिज्ञाननाश्यत्व-रूपमिथ्यात्वसत्त्वात् मिथ्यात्वलक्षणस्यातिव्याप्तिः। अपि च सिद्धान्ते पूर्वज्ञानस्यापि मिथ्यात्वेन तत्र लक्षणस्यातिव्याप्तिप्रदर्शनं न सङ्गच्छते, सिद्धसाधनतापत्तिश्च।

घटादौ मिथ्याभूते मुद्गरपातादिनिवर्त्ये अस्य लक्षणस्य अव्याप्तिः स्यात्। किञ्च सिद्धान्ते घटस्यापि मिथ्यात्वेन लक्ष्यत्वात्, ज्ञाननाश्यत्वरूपमिथ्यात्वलक्षणस्य तत्राभावदव्याप्तिः।

उत्तरज्ञाननाश्ये पूर्वज्ञानेऽतिव्याप्तिवारणाय ज्ञानत्वेन ज्ञाननाश्यत्वमेव मिथ्यात्वं यद्युच्यते, तर्हि नाशकतावच्छेदकमत्र ज्ञानत्वम्। उत्तरज्ञाने यद्यपि पूर्वज्ञाननाशकता वर्तते तथापि नाशकतावच्छेदकं न ज्ञानत्वम्, किन्तु स्वोत्तरवर्तिविशेषगुणत्वमेव।

स्वोत्तरवर्तिविशेषगुणत्वेनोत्तरज्ञाननाश्यत्वं पूर्वज्ञाने वर्तते न तु ज्ञानत्वेन ज्ञाननिवर्त्त्यत्वम्। तथा च ज्ञानत्वेन ज्ञाननिवर्त्यत्वं मिथ्यात्वमिति चेत् - ज्ञानत्वेन ज्ञाननिवर्त्यत्वपक्षेऽपि घटादौ अव्याप्तिं वारयितुं न शक्या।

किञ्च अधिष्ठानसाक्षात्कारत्वेन निवर्त्ये प्रसिद्धे दृष्टन्ते शुक्तिरजतादौ ज्ञानत्वेन ज्ञाननिवर्त्यत्वस्य साध्यस्य अभावाद् दृष्टान्तस्य साध्यविकलत्वं स्यात्। अपि च आरोपितशुक्तिरजतादेः तदधिष्ठानतत्त्वसाक्षात्कारत्वेन नाश्यत्वान्नाशकतावच्छेदकमधिष्ठान-तत्त्वसाक्षात्कारत्वं न तु ज्ञानत्वम्। तथा च प्रसिद्धेऽपि लक्ष्ये शुक्तिरजतादौ लक्षणस्यागमनात् कुत्राप्यारोपिते वस्तुनि ज्ञानत्वेन ज्ञाननिवर्त्त्यत्वाभावाल्लक्षणस्यासम्भवः।

एतत्परिहाराय ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वं वा मिथ्यात्वं भवत्विति चेद् अधिष्ठानतत्त्वसाक्षात्कारत्वेन ज्ञाननिवर्त्त्ये शुक्तिरजतादौ न साध्यविकलता नापि लक्षणे असम्भवदोषः, साक्षात्कारत्वस्यापि ज्ञानत्वव्याप्यधर्मत्वात्।

परन्तु ज्ञानत्वव्याप्यधर्मेण स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे मिथ्यात्वलक्षणस्यातिव्याप्तिः (सिद्धसाधनं) स्यात्, संस्कारनाशक-तावच्छेदकस्मृतित्वस्य ज्ञानत्वव्याप्यधर्मत्वात्। स्मृतिनाश्यत्वेन संस्कारस्य मिथ्यात्वव्यवहाराभावात्। स्मृतित्वं न संस्कारनाशक-तावच्छेदकमित्यपि वक्तुं न शक्यते। यतः स्मृतित्वं स्वोत्तरोत्पन्नात्मविशेषगुणत्वमेव। आत्मविशेषगुणत्वं तु न ज्ञानत्व-व्याप्यधर्मः। तथा च ज्ञानत्वव्याप्यधर्मेण ज्ञाननाश्यत्वाभावान्न संस्कारेऽतिव्याप्तिरिति वाच्यम्। स्वोत्तरोत्पन्नात्मविशेषगुणत्वेन स्मृतिः संस्कारनाशकत्वे इच्छादितोऽपि संस्कारनाशप्रसङ्गात् । अतः इदं लक्षणं नोपपद्यते।

<u>**एवं पूर्वपक्षप्राप्ते सिद्धान्तमाह**</u> –

ज्ञाननिवर्त्यत्वं नाम ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियो-गित्वम्। अत्र ज्ञानपदमधिष्ठानतत्त्वज्ञानपरम्। प्रयुक्तपदं व्यापकपरम्। अवस्थितिसामान्यं च स्वस्वीयसंस्कारान्यतररूपम्। विरहपद-मत्यन्ताभावपरम्। तथा च अधिष्ठानतत्त्वज्ञानव्यापको योऽज्ञाना-देरवस्थितिसामान्यस्यात्यन्ताभावःतत्प्रतियोगित्वं मिथ्यात्वम्। ज्ञान-प्रयुक्तोऽधिष्ठानतत्त्वज्ञानाधीनोऽवस्थितिसामान्यस्य स्वस्वीयसंस्का-रोभयरूपस्य यो अत्यन्ताभाव: तत्प्रतियोगित्वमेव मिथ्यात्वम्।

तत्राद्वैते पदार्थजातस्य सर्वस्यापि द्वेधा अवस्थानं भवति - स्वरूपेण कारणात्मना च, सत्कार्यवादस्य स्वीकृतत्वात्। एवञ्च मुद्गरपातेन घटस्य स्वरूपतो निवृत्तावपि कारणात्मना निवृत्तिः नैव भवति। मुद्गरपातेन घटस्वरूपस्य नाशेऽपि घटस्य स्वरूपसंस्कारोभयनाशः ब्रह्मज्ञानाधीन एव। मुद्गरपातानन्तरं घटः स्वरूपेण नष्ट इत्यनुभववत् कारणात्मना नष्ट इत्यनुभवा-भावात्।तस्मान्नास्ति घटादौ अतिव्याप्तिः।

एवमेव उत्तरज्ञाननिवर्त्यस्यापि पूर्वज्ञानस्य कारणात्मनावस्थानं वर्तते एवेति तत्रापि न सिद्धसाधनम्। घटादीनां सर्वेषां स्वरूपतः कारणात्मना च सर्वथा निवृत्तिस्तु अखण्डब्रह्मज्ञानादेव भविष्यति। वियदादिप्रपञ्चस्य 'अतोऽन्यदार्तम्' 'नेह नानास्ति किञ्चन' 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' 'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' - इत्यादिश्रुतिभिः अत्यन्ताभावप्रतियोगित्वं ज्ञानप्रयुक्तं प्रतिपाद्यते इति वियदादिप्रपञ्चे अस्मदभिलषितं मिथ्यात्वं सिद्ध्यत्येवेति नार्थान्तरमपि।

शशविषाणादौ अवस्थितिसामान्यविरहप्रतियोगित्वस्य सत्त्वात् तुच्छेऽतिव्याप्तमिदं लक्षणमिति चेत् तस्य ज्ञानप्रयुक्तत्वाभावात् तुच्छे लक्षणस्य नातिव्याप्तिरिति। शुक्तिरजतादेस्तु प्रतिभासकालेऽवस्थितिः अङ्गीक्रियते, अन्यथा तस्य अपरोक्षप्रतीतिः नोपपद्येत। तथा च शुक्तिरूप्यादेः अवस्थितिसामान्यविरहः शुक्तित्वादिज्ञानप्रयुक्त एवेति न दृष्टान्ते साध्यवैकल्यम्। 'इयं शुक्तिः" इति ज्ञानानन्तरमेव **'मिथ्यैव रजतमभात्,** शुक्तौ **रूप्यं नास्ति, नासीत्, न भविष्यति'** इत्यनुभुयते। तथा च सर्वप्रपञ्चस्यापि परिणाम्युपादानरूपस्य मूलाज्ञानस्य ब्रह्मज्ञानेन बाधे सति अज्ञानप्रयुक्तस्य सर्वस्यापि प्रपञ्चस्य पूर्वोक्तपरिष्कृतं मिथ्यात्वं पर्यवस्यति। अत एवोक्तं विवरणाचार्यैः- “अज्ञानस्य स्वकार्येण प्रविलीनेन वर्तमानेन वा सह ज्ञानेन निवृतिर्बाधः” इति ।

विषयेऽस्मिन् प्रमाणतया वार्तिककृतामपि वचनमुदाह्रियते -

**'तत्त्वमस्यादिवाक्योत्थ सम्यग्धीजन्ममात्रतः।**

**अविद्या सह कार्येण नासीदस्ति भविष्यति।।'** इति।

अत्र ''सह कार्येण नासीदित्यनेन'' कार्यस्य अतीतत्वेनैव कारणीभूताविद्याया अतीतत्वम्, न तु स्वरूपेण वर्तमानायाः अविद्यायाः अतीतत्वम्। “न भविष्यति” इत्यत्रापि भाविकार्य-विशिष्टाया अविद्याया निवृत्तिरेव बोध्यते ।

रूप्योपादानमज्ञानं स्वकार्येण वर्तमानेन लीनेन वा सह अधिष्ठानसाक्षात्कारान्निवर्त्तते। तत्त्वज्ञानप्रयुक्तशुक्तिरूप्यादीनां निवृत्तिरिति सर्वानुभवसिद्धा, शुक्तिरूप्यादीनामज्ञानप्रयुक्तत्वात्।

**अत्रेयं शङ्का** - 'एकमेवाज्ञानं सर्वप्रपञ्चकारणम् - इति, शुक्त्याद्यावरकाणि अज्ञानानि पृथक् पृथक् न' इति मते शुक्तिरूप्यादीनामपि मूलाज्ञानोपादानकतया ब्रह्मसाक्षात्कारादेव निवृत्तिः सम्भवति, न तु शुक्तितत्त्वसाक्षात्कारात्, शुक्तितत्त्व-साक्षात्कारनिवर्तनीयस्याज्ञानस्यानभ्युपगमात्। एवं च प्रकृतसाध्यं ज्ञाननिवर्त्यत्वं शुक्तिरूप्यदृष्टान्ते प्रसिद्धं न भवितुमर्हति। तथा च शुक्तिरूप्यादेः यज्ज्ञाननिवर्त्त्यत्वं तन्न प्रकृतानुमानात्पूर्वं ग्रहीतुं शक्यम्, ज्ञाननिवर्त्त्यत्वरूपसाध्यस्याग्रहणेन व्याप्तिग्रहः कथं स्यात् ?

**समाधानम्** - इदं तृतीयं लक्षणं ज्ञाननिवर्त्यत्वरूपं नानाऽज्ञानपक्ष एव स्वीक्रियते। एकाज्ञानपक्षे सदसद्विलक्षणत्व त्रैकालिकनिषेधप्रति-योगित्वादिकमेव साध्यं विवक्ष्यते। नानाऽज्ञानपक्षे शुक्तितत्त्व-साक्षात्कारनिवर्तनीयस्य अज्ञानस्य प्रसिद्धत्वात् प्रकृतानुमा-नात्पूर्वमपि शुक्तिरूप्यादौ ज्ञान्निवर्त्त्यत्वरूपसाध्यज्ञानं सम्भवति। तस्मात् दृष्टन्ते शुक्तिरूप्यादौ साध्यस्य ज्ञाननिवर्त्त्यत्वस्य सत्त्वान्न तत्र साध्यवैकल्यम्। अथवा एकाज्ञानपक्षेऽपि इदं संभवत्येव, तथा हि-शुक्तिरूप्ये तावत् 'शुक्तिरूप्यं मिथ्या दोषजन्यधीविषयत्वात्, श्रुतिसिद्धब्रह्मज्ञाननिवर्त्यमूलाज्ञानवियदादिवत्'- इत्यनुमानेन साध्य-सिद्धिं विधाय तदृष्टान्तेन वियदादिपक्षकेऽनुमाने शुक्तिरूप्यं दृष्टान्तः, शुक्तिरूप्यपक्षकेऽनुमाने रज्जुसर्पः दृष्टान्तः, रज्जुसर्पपक्षके स्वाप्नगजादिकं दृष्टान्तः, पूर्वपूर्वानुमानानां विरलानामपेक्षणेऽपि नानवस्था, बीजाङ्कुरवत्। अतः शुक्तिरूप्यादिषु व्याप्तिग्रहः सम्भवत्येव। तथा च निर्दुष्टमिदं लक्षणं यत् ज्ञाननिवर्त्यत्वस्य मिथ्यात्वमिति सिद्धम्।।

**सहायकग्रन्थसूची** -


1. अद्वैतसिद्धिः, बालबोधिनीव्याख्यासहिता, तारा पब्लिकेशन्स, १९७१।
2. अद्वैतसिद्धिः सिद्धि-लघुचन्द्रिका-विट्ठलेशीव्याख्यासहिता, निर्णय-सागरमुद्रणालयः, १९७३।
3. अद्वैतसिद्धिसिद्धान्तसारः, विद्याविलासमन्त्रालयः, हरिदासगुप्तः, १९६०।
4. श्रीमद्भगवद्गीता, गीतप्रेश, गोरखपुरः, १९८८।